Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2025 GISRRJ | Volume 8 | Issue 3 | ISSN : 2582-0095
doi : https://doi.org/10.32628/GISRRJ

# अपत्यं-युवापत्यं-गोत्रापत्यमेतेषां व्याकरणरीत्या समीक्षणम् ।

मनीषा साहू
शोधच्छात्रा, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Article Info**
Volume 8, Issue 3
**Page Number :** 17-24
**Publication Issue :**
May-June-2025
**Article History**
Accepted : 01 May 2025
Published : 05 May 2025

सारांशः – संस्कृतव्याकरणस्य तद्धितप्रकरणे विशेषाः विषयाः वर्णिताः सन्ति । तेषु अपत्याधिकारस्य अपत्यं-युवापत्यं-गोत्रापत्यमेतेषां विषये समीक्षा मया अत्र यथामति कृता ।

विशेषशब्दाः- स्थविरतरः , गोत्रापत्यम् , युवापत्यम् , वंश्यः , गार्ग्यायणः , गार्ग्यः , ज्यायसी इत्यादयः ।

पाणिनीयव्याकरणशास्त्रस्य तद्धितप्रकरणे अपत्याऽर्थे , युवापत्यार्थे , गोत्रापत्यार्थे च अनेकानां प्रत्ययानां विधानं भवति । तत्र अपत्यशब्दस्य सम्बन्धे अमरसिंहेन अमर-कोशे उल्लिखितं यत् –

"आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ॥"[1]

कोशवचनानुसारं पुत्र-अर्थे मुख्यतः अपत्य-शब्दः अस्ति , परंन्तु अपत्य-शब्दस्य यौगिक-अर्थे ग्रहणे , अपत्यशब्देन "सन्तान" इत्यर्थोऽपि स्वीक्रियते ।

भाष्यकारेण "पङ्क्तिविंशतित्रिंसत्चत्वारिंशत्पढञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्"[2] इति सूत्रे "न पतन्ति नरके पितरो येन तदपत्यम्"[3] । येषां श्राद्धादिकर्मभिः पितराणां नरकात् उद्धरणं भवति , तानि अपत्यानि । अतः "अपत्यम्" अनेन शब्देन पुत्रपौत्रादीनां सर्वेषां ग्रहणं भवति इति तु वक्तुं शक्यते ।

1 अमरकोशः , द्वितीयकाण्डम् , मनुष्यवर्गः
2 अष्टाध्यायी - 5/1/51
3 महाभाष्यम् , पञ्चमोऽध्यायः

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

अपत्यार्थे "तस्यापत्यम्"[4] सूत्रेण अण् , "अत इञ्"[5] सूत्रेण इञ् "बाह्वादिभ्यश्च"[6] "सुधातु रकङ् च"[7] सूत्राभ्यां अपि इञ् , " हरितादिभ्योऽञः(4/1/100)" सूत्रेण फक् , शिवादिभ्योऽण् (4/1/112) सूत्रेण अण् , अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः (4/1/113) सूत्रेण अण् ऋष्यन्धकवृष्णकुरुभ्यश्च (4/1/114) सूत्रेण अण् , मातुरुत्संख्यासंभद्रपूर्वायाः (4/1/115), कन्यायाः कनीन च (4/1/116) , विकर्णशुङ्गच्छलाद्वत्सभरद्वाजात्रिषु (4/1/117) ,पीलाया वा (4/1/118) इत्येतैः सूत्रैः अण् , ढक् च मण्डुकात् (4/1/119), स्त्रीभ्यो ढक् (4/1/120) , द्व्यचः(4/1/121), इतश्चानिञः(4/1/122), शुभ्रादिभ्यश्च(4/1/123) , विकर्णकुशीतकात् काश्- यपे(4/1/124), भ्रुवो वुक् च(4/1/125) , कल्याणादीनामिनङ्(4/1/126), कुलटाया वा (4/1/127), इत्येतैः सूत्रैः ढक्, चटकाया ऐरक् (4/1/128) सूत्रेण ऐरक् , गोधाया ढ्रक् (4/1/129) सूत्रेण ढ्रक् , आरगुदीचाम् ( 4/1/130) सूत्रेण आरक् , क्षुद्राभ्यो वा (4/1/131), सुत्रेण ढ्रक् , पितृष्वसुश्छण् (4/1/132) , सूत्रेण छण् , चतुष्पाद्भ्यो ढञ् (4/1/135) सूत्रेण ढञ् , गृष्ट्यादिभ्यश्च (4/1/136) सूत्रेण ढञ् , राजश्वशुराद्यत् (4/1/137) सूत्रेण यत् , क्षत्रा- द् घः (4/1/138) , कुलात्खः(4/1/139) सूत्रेण खः, अपूर्वपदादन्यरस्यां यड्ढकञौ(4/1/140) सूत्रेण यत-ढकञ् ,महाकुलादञ्खञौ (4/1/141) सूत्रेण अञ्-खञ् , दुष्कुलाड् ढक्(4/1/142) सूत्रेण ढक् , स्वसुश्च(4/1/143) सूत्रेण छः , भ्रातुर्व्यच्च(4/1/144) सूत्रेण व्यत्-छः, रेवत्या- दिभ्यष्ठक् (4/1/146) सूत्रेण ठक् , गोत्रस्त्रियाः कुत्सने ण च(4/1/147)सूत्रेण णः , वृद्धाट्ठ- क् सौवीरेषु बहुलम्(4/1/148) सूत्रेण ठक् , फाण्टाहतिमिमताभ्यां णफिञौ(4/1/150) सूत्रेण ण-फिञ् , कुर्वादिभ्यो ण्यः(4/1/151) सूत्रेण ण्यः, सेनान्तलक्षणकारिभ्यश्च(4/1/152) सूत्रेण ण्यः, उदीचामिञ्(4/1/153) सूत्रेण इञ् , तिकादिभ्यः फिञ् (4/1/154) , कौसल्यकार्मार्या- भ्यां च ( 4/1/155) , अणो द्व्यचः(4/1/156), उदीचां वृद्धादगोत्रात्(4/1/157), वाकिवादीनां कुक्च(4/1/158) इत्येतैः फिञ्, प्राचामवृद्धात् फिन् बहुलम् (4/1/160) इति सूत्रेण फिन्, जनपदशब्दात् क्षत्रियादञ् (4/1/166) , साल्वेयगान्धारिभ्यां वा(4/167) सूत्रेण अञ् , द्व्य- ञ्मगधकलिङ्गसुरमसादण्(4/1/168) सूत्रेण अण् , वृद्धेत्कोसलाजादाञ्ञ्यङ् (4/1/169) सूत्रेण ञ्यङ् , कुरुनादिभ्यो ण्यः( 4/1/170) सूत्रेण ण्यः , साल्वावयवप्रत्यग्रथकलकूटाश्म- कादिञ् (4/1/171) सूत्रेण इञ् एते प्रत्ययाः अपत्यार्थे विधीयन्ते । तद्यथा - दक्षस्य अपत्यं पुमान् - दाक्षिः ।

---

4 अष्टाध्यायी - 4/1/92
5 अष्टाध्यायी – 4/1/95
6 अष्टाध्यायी – 8/1/96
7 अष्टाध्यायी -4/1/97

दक्ष ङस् — अत इञ् – "तस्यापत्यम्" अस्मिन् अर्थे "दक्ष ङस्" इति अदन्तात् प्रादिपदिकात् इञ् प्रत्ययः भवति ।

दक्ष ङस् इञ् — सुपो धातुप्रातिपदिकयोः- सूत्रेण सुप् लुक् ।


दाक्ष इञ् — तद्धितेष्वचामादेः- सूत्रेण अङ्गस्य आदि वृद्धिः ।

दाक्ष् इञ् — यस्येति च – इति सूत्रेण अकारलोपः ।

दाक्षि सु - दाक्षिः इति रूपं सिध्यतीति ।

एवञ्च पाणिनीय व्याकरणे अपत्यार्थे प्रायः एकोनचत्वारिंशत् सूत्रैः अण्-इञ्-फक्-ढक्-ऐरक्-ढ्रक्-छण्-ढञ्-यत्-छ-ख-ढकञ्-अञ्-खञ्-व्यत्-छ-ठक्-ण-फिञ्-ण्य-फिन् इति एकविं- शति- प्रत्ययानां विधानं वर्तते ।

"अपत्यम्" इत्येतस्यानन्तरं किम् नाम युवापत्यम् इत्यत्र जीवति तु वंश्ये युवा[8],
भ्रातरि च ज्यायसी[9], वान्यस्मिन् सपिण्डे स्थविरतरे जीवति[10] इति सूत्रत्रयं पाणिनिना प्रोक्तम् ।
वंश्ये - पित्रादौ जीवति सति पौत्रप्रभृतेर्यदपत्यं (चतुर्थादारभ्य) तद् युवसंज्ञं भवति[11] इति तु प्रथमसूत्रास्यार्थः । नाम "वंश्यः" इत्युक्ते पितराः, "जीवति वंश्ये" इत्युक्ते वंश्य जीवितः अस्ति चेत् इत्यर्थः । एवं अस्य सूत्रस्य सरलतया अर्थः भवति - पौत्रप्रभृतेः यत् अपत्यम्, तस्य पितरेषु कोऽपि जीवितः अस्ति चेत् तस्य युवा संज्ञा भवति ।
यथा - अजस्य अपत्यं दशरथः। दशरथस्य अपत्यं श्रीरामचन्द्रः। श्रीरामचन्द्रस्य अपत्यौ कुशलवौ इति । अत्र अजः-दशरथः-रामचन्द्रः एतेषु कोऽपि जीवितः अस्ति ,
तर्हि लवकुशौ अजस्य "युवापत्यौ" स्त इति प्रकृतसूत्रानुसारं वक्तुं शक्यते ।"अपत्यं पौत्र-प्रभृति गोत्रम्"[12] सूत्रस्य सूत्रमिदं बाधकं भवतीति । गोत्रापत्यं बाधित्वा प्रकृतसूत्रेण युवसंज्ञा भवतीति ।




8 अष्टाध्यायी सूत्र संख्या - 4/1/163

9 अष्टाध्यायी सूत्र संख्या - 4/1/164

10 अष्टाध्यायी सूत्र संख्या - 4/1/165

11 अष्टाध्यायी-भाष्य- प्रथमावृत्तिः ( द्वितीयभागः) , सू.सं - 4/1/163

12 अष्टाध्यायी सूत्र संख्या – 4/1/162

अज-दशरथ-राम-एतेषु कोऽपि जीवितः अस्ति चेत्, लवकुशौ अजस्य युवापत्यौ इति वक्तुं शक्यते ।

युवापत्यस्य प्रत्ययविधान-सन्दर्भे "गोत्राद्यून्यस्त्रियाम्"[13] इति सूत्रेण नियमः क्रियते, तद्यथा- गोत्राप्रत्ययान्तादेव युवप्रत्ययः स्यात् , न त्वनन्तरापत्यात् , न प्रथमप्रकृतेः
इति ।

गार्ग्यस्य युवापत्यं युवा =गार्ग्यायणः इति सूत्रस्यास्य उदाहरणेषु एकम् । गर्गः इति कश्चन व्यक्तिः । गर्गस्य अनन्तरापत्यं भवति गार्गिः ( अत इञ् सूत्रेण गर्ग शब्दात् इञ् प्रत्ययः) , गर्गस्य गोत्रापत्यम् भवति गार्ग्यः ( गर्गादिभ्यो यञ् सूत्रेण गर्गशब्दात् यञ् प्रत्ययः) , अधुना गर्गस्य युवापत्यम् इत्यत्र कस्मात् प्रातिपदिकात् युवापत्यार्थे प्रत्ययः स्यात् इत्युक्ते "गोत्राद्यून्यस्त्रियाम्" सूत्रेण युवापत्यस्य निर्देशार्थं गोत्रप्रत्ययान्तशब्दात् एव प्रत्ययः स्यात् इति नियमः कृतः । अतः गार्ग्य शब्दात् प्रत्ययं कृत्वा युवापत्य-शब्दस्य सिद्धिर्भवतीति भावः । तत्तु अत्र संक्षेपेण प्रदर्श्यते -

गार्ग्यस्य युवापत्यं - गार्ग्यायणः

| | |
|---|---|
| गार्ग्य ङस् | |
| गार्ग्य ङस् फक् | यञिञोश्च - युवापत्यस्य निर्देशार्थं गार्ग्य इति यञ् प्रत्ययान्त-गोत्रापत्यवाचकात् शब्दात् फक् प्रत्ययः भवति । |
| गार्ग्य फ | सुपो धातुप्रातिपदिकयोः - सूत्रेण सुप् लुक् । |
| गार्ग्य आयन | आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्- सूत्रेण फ् - इत्येतस्य आयन्- आदेशः । |
| गार्ग्य् आयन | यस्येति च - इति सूत्रेण अकारलोपः । |
| गार्ग्यायण | नस्य णत्वविधानम् । |

गार्ग्यायण सु --- गार्ग्यायणः , इति युवापत्यस्य रूपमिदं सिद्ध्यति ।

"जीवति तु वंश्ये युवा" इति सूत्रेण प्रपौत्रादीनाम् एव युवसंज्ञा भवितुमर्हति पौत्रस्य न । यथा - यद्यपि अजः जीवितः अस्ति तथापि रामः अजस्य युवापत्यं भवितुं नार्हति, य-तो हि रामः अजस्य पौत्रः अस्ति, न तु प्रपौत्रः ।

मुख्यतः "यञिञोश्च"[14] सूत्रेणैव युवापत्यार्थे प्रत्ययः विधीयते ।


ज्यायसी भ्रातरि जीवति सति पौत्रप्रभृतेरपत्यं कनीयान् भ्राता युवसंज्ञा भवतीति द्वितीय-युवसंज्ञा विधायकसूत्रस्य आशयः । ( भ्रातरि च ज्यायसी) ।

13 अष्टाध्यायी सूत्र संख्या - 4/1/96

14 अष्टाध्यायी सूत्र संख्या – 4/1/101

यदि वंश्यः ( पित्रादयः) जीवितः अस्ति, तर्हि "जीवति तु वंश्ये युवा" ( 4/1/136) सूत्रेणैव "युवा" संज्ञा भवति , तदर्थं प्रकृतसूत्रस्य आवश्यकता नास्ति । यदि सर्वे पित्राद- यः मृताः सन्ति , तर्हि पौत्रादीनां यद् अपत्यं तस्य युवासंज्ञा तु "भ्रातरि च ज्यायसि" सूत्रेण भवति, यदि ज्येष्ठभ्राता जीवितः अस्ति चेत् । काशिकाकारोऽपि वदति – " अवं- श्यार्थः अयमारम्भः ।[15] इदमपि सूत्रं "अपत्यं पौत्रप्रभृति गोत्रम्" सूत्रस्य बाधकं सूत्रं वर्तते । "अपत्यं पौत्रप्रभृति गोत्रम्" अनेन सूत्रेण पौत्रप्रभृतीनां गोत्रसंज्ञायां प्राप्तायां, प्रकृतसूत्रेण
प्रकृतसूत्रेण युवसंज्ञा भवति इति ।

तद्यथा – अजस्यापत्यं , दशरथस्यापत्यं रामः , दशरथस्य अपत्यञ्च लवः । अत्र "अपत्यं पौत्रप्रभृति गोत्रम्" (4/1/162) इत्यनेन लवस्य "अजस्य" गोत्रापत्यम् इति संज्ञा
कर्तुं शक्यते । परंतु लवस्य ज्येष्ठः भ्राता कुशः जीवितः अस्ति, तर्हि लवः अजस्य युवा- पत्यमस्ति इति इति तु "भ्रातरि च ज्यायसि" सूत्रेणानेन सिध्यते यदि सर्वे पित्रादयः मृताः सन्ति चेत् ।




गर्गस्य युवापत्यं गार्ग्यायणः पूर्वसूत्रवत् अस्य सूत्रस्यापि उदाहरणं इदमेव ग्रहीतुं श- क्यते । अत्रापि यञिञोश्च (4/1/101) सूत्रेणैव युवापत्यार्थे प्रत्ययः भवति इति भावः ।

भ्रातुरन्यस्मिन् सपिण्डे स्थविरतरे – वृद्धतरे जीवति सति पौत्रप्रभृतेरपत्यं जीवदेव युव- संज्ञं वा भवति इति तृतीय-युवसंज्ञा विधायकसूत्रास्याशयः ।

पौत्रप्रभृतेः यद् अपत्यम् , तत् जीवितमस्ति चेदेव तस्य अनेन सूत्रेण युवासंज्ञा भ- वितुं शक्यते , न अन्यथा । जीवति तु वंश्ये युवा (4/1/163) , तथा भ्रातरि च ज्यायसि

(4/1/164) एतयोः दत्ता युवसंज्ञा मृतस्य अपि भवितुमर्हति । परंतु वर्तमानसूत्रेण युवासंज्ञा केवलं जीवितस्यैव भवति इति ।

जीवितस्य विधीयमाना इयं युवसंज्ञा सपिण्डे स्थविरतरे जीवति सति भवति ।"सपिण्ड" इत्युक्ते सप्तमपुरुषं यावत् पितराः । "स्थविरतरः" इत्युक्ते ज्येष्ठः । अतः भ्रातरं विय सप्तमपुरुषं यावत्सु पितरेषु कोऽपि स्थानेन वयसा वा ज्येष्ठः जीवितः अस्ति , तर्हि पौत्रादीनाम् यत् जीवितमपत्यम्, तस्य विकल्पेन युवसंज्ञा विधीयते ।

तद्यथा अजस्य प्रपौत्र अस्ति कुशः । अपत्यं पौत्रप्रभृतिः गोत्रम् (4/1/162) इत्यनेन जनमेजयः अर्जुनस्य "गोत्रापत्यम्" अस्तीति वक्तुं शक्यते । परंतु यदि अस्यैव वंशस्य भरतः जीवितः अस्ति, तर्हि भरतः कुशस्य "जीवितः स्थविरतरः सपिण्डः" भवति, तथा च कुशः स्वयं जीवितः अस्ति चेत् सः विकल्पेन भरतस्य "युवापत्यम्" भवति । अत्र अजः जीवितः अस्ति उत वा नास्ति एतत्तु नावश्यकम् । कश्चन स्थविरतरः सपिण्डः जीवितः भवेत् , तथा यस्य युवापत्यसंज्ञा भविष्यति सः स्वयं जीवितः भवेत् इत्येव आवश्यकम् ।

एवञ्च युवसंज्ञा विधानार्थं सूत्रत्रयं व्याकरणे उल्लिखितम् । युवापत्यार्थे प्रत्ययविधानार्थमपि यञिञोश्च इति सूत्रमेकमेव वर्तते ।

एतदनन्तरं किं नाम गोत्रापत्यम् इत्यत्र अपत्यं पौत्रप्रभृति गोत्रम् (4/1/162) सूत्रमिदं पाणिनीय व्याकरणे पाणिनिना प्रोक्तम् ।

तद्यथा – अजस्य पुत्रः दशरथः । दशरथस्य पुत्रः लक्ष्मणः , अर्थात् लक्ष्मणः अजस्य "पौत्रः" । अतः लक्ष्मणः अजस्य गोत्रापत्यमिति भवितुमर्हति । एवञ्च लक्ष्मणस्य पुत्रः चन्द्रकेतुः, एषः अजस्य प्रपौत्रः , अतः चन्द्रकेतुः अपि अजस्य गोत्रापत्यमिति भावः । तथैव चन्द्रकेतोः पुत्रः विशेनः आसीत् , सः अजस्य प्रप्रपौत्रः आसीत् । अतः विशेनः अपि अजस्य गोत्रापत्यं भवतीति सूत्रस्य भावः ।

यत् साक्षात् अपत्यं , तस्य तु गोत्रसंज्ञा न भवति , तस्य अनन्तरापत्यम् इति संज्ञा भवति । तद्यथा दथरथः अजस्य अनन्तरापत्यं न तु गोत्रापत्यमिति । राम अजस्य गोत्रापत्यं किन्तु दशरथस्य अनन्तरापत्यमिति एवञ्च व्याकरणशास्त्रे "गोत्रम्" इति एकः पारिभाषिकः शब्दः वर्तते । लोके तु "गोत्रम्" इति शब्दः वंशस्य कृते प्रयुज्यते , तथा च ऋषिणां नाम्ना प्रचलितः भवति इति ।

गोत्रापत्यार्थे "गोत्रे कुञ्जादिभ्यश्च्फञ्" [16] सूत्रेण च्फञ् , नडादिभ्यः फक्[17] सूत्रेण फक्

16 . अष्टाध्यायी सूत्रसंख्या - 4/1/98

17 अष्टाध्यायी सूत्रसंख्या - 4/1/99

शरद्वच्छुनकदर्भात् भृगुवत्साग्रायणेषु[18] सूत्रेण फक् , द्रोणपर्वतजीवन्तादन्यतरस्याम्[19] सूत्रेण फक् , अनृष्यानन्तर्ये बिदादिभ्योऽञ्[20] सूत्रेण अञ् , गोत्रादिभ्यो यञ्[21] सूत्रेण यञ् , अश्वादिभ्यो फञ्[22] सूत्रेण फञ् , भर्गात् त्रैगर्ते[23] सूत्रेण फञ्, एते प्रत्ययाः विधीयन्ते ।


एवञ्च प्रायः अष्ट-सूत्रैः प्रत्ययचतुष्टयस्य विधानं गोत्रापत्यार्थे भवति ।

उदाहरणं यथा - गर्गस्य गोत्रापत्यं गार्ग्यः ।

| | |
|---|---|
| गर्ग ङस् | गर्गादिभ्यो यञ् - अनेन सूत्रेण "गर्ग ङस्" इत्येतस्मात् गोत्रापत्यार्थे यञ् विधीयते । |
| गर्ग ङस् यञ् | सुप् लुक् , आदिवृद्धिः , अकारलोपश्च |
| गार्ग्य सु | |
| गार्ग्यः | |

गोत्रापत्ये "गार्ग्य" इति रूपं सिद्ध्यति ।

1.




18 अष्टाध्यायी सूत्रसंख्या - 4/1/102

19 अष्टाध्यायी सूत्रसंख्या - 4/1/103

20 अष्टाध्यायी सूत्रसंख्या - 4/1/104

21 अष्टाध्यायी सूत्रसंख्या - 4/1/105

22 अष्टाध्यायी सूत्रसंख्या - 4/1/110

23 अष्टाध्यायी सूत्रसंख्या - 4/1/111

2. गर्गः

↓

गार्गिः ( अत इञ् )

↓

गार्ग्यः ( गर्गादिभ्यो यञ् )

↓

गार्ग्यायणः ( यञिञोश्च )

↓

गार्ग्यः ( गर्गादिभ्यो यञ् )

↓

गार्ग्यः

एवं रीत्या पाणिनीय-व्याकरणस्य सूत्रानुसारं अपत्यम् – युवापत्यम् – गोत्रापत्यम् एतेषां त्रयाणां सन्दर्भे यथामति समीक्षणं कृतं मया ।

## परिशीलितग्रन्थसूची


1. अष्टाध्यायी पं . ईश्वरचन्द्रः , चौखम्बा पब्लिशर्स्
2. काशिकावृत्तिः, न्यासपदमञ्जरीसहिता, डाँ . नारायण मिश्रः , रत्ना पब्लिकेशन्स् , वाराणसी
3. काशिकान्यासपदमञ्जरी संस्कृत एवं भावबोधिनी हिन्दी टीका , डाँ . जयशंकरलाल त्रिपाठी , तारा पब्लिकेशन्स् , वाराणसी
4. महाभाष्यम् प्रदीपद्योतराजलक्ष्मीटीकासहितम्, गुरुप्रसादशास्त्री, प्रतिभा प्रकाशन, नई दिल्ली
5. अष्टाध्यायी-भाष्य-प्रथमावृत्तिः , भाग – द्वितीयः , ब्रह्मदत्त जिज्ञासु , रामलालकपूरट्रस्ट , प्रेस , बहालगढ , हरयाणा
6. वैयाकरण-सिद्धान्त-कौमुदी , भट्टोजी दीक्षित , चौखम्बा संस्कृत संस्थान